# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवेम्बर-दिसम्बर, २०१६

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् –४** गुणाः – ७०

विषयः – फलितज्योतिषम् **कोड – C.C.4.1.3** समयः – ०३:००-०६:००

दिनाङ्कः -०८-१२-१६ सन्दर्भग्रन्थः – जातकपारिजातः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या। ०४**

(१) मीनालिकर्कटमृगाः सलिलाभिधानास्तोयाश्रया घटवधुयुगगोपसंज्ञः।
निस्तोयभूतलचराः क्रियचापतौलिकण्ठीरवाश्च बहवः प्रवदन्ति सन्तः॥

(२) शनिरतिबलशाली पाद्दृग्वीर्ययोगेसुरकुलपतिमन्त्री कोणदृष्टौ शुभः स्यात्।
त्रितयचरणदृष्ट्या भूकुमारः समर्थः सकलगगनवासाः सप्तमे दृग्बलाढ्याः॥

**प्रश्नः – २ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत। १२**

(१) ग्रहाणां स्वरूप-दृष्टि-वर्ण-स्थानादि निरूपणं कुरुत

(२) मेषादिनां चतुष्पदादिनांसञ्ज्ञापूर्वकं बलित्वकथनम्

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत। ०४**

(१) राशिनां सलिलादिविशेषसंज्ञाः

(२) प्रथमभावस्य नामान्तराणि

(३) ग्रहाणां द्रव्याः

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ४ अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या। ०४**

(१) ताताम्बिकासोदरमातुलाश्च मातामही मातृपिता च बालः।
सूर्यादिकैः पञ्चमधर्मयतैः क्रुरर्क्षगैराशु हताः क्रमेण॥

(२) गुरुशशिसहिते कुलिरलग्ने शशितनये भृगुजे च केन्द्रयाते।
भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद्विना स्यात्॥

**प्रश्नः – ५ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत। १२**

(१) जातस्य मातृमरणयोगाः

(२) दुर्मरणयोगाः

**प्रश्नः – ६ अधोनिर्दिष्टेषु टिप्पणीद्वयं लिखत। ०४**

(१) युगान्तमायुः

(२) दशायुः

(३) पित्तरोगात् मृत्युयोगः

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ७ अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या।** ०४

(१) मन्देकेन्द्रगते विलग्नगृहगे चन्द्रेऽन्त्यभे वाक्पतौ।
जातो भिक्षुक एव शोकजलधौ मग्नो विदेशं गत॥
धर्मस्थानपतौ तु रिःफगृहगे पापग्रहे केन्द्रगे।
जात: पापरत: परान्नधनभुग् विद्याविहीनो भवेत्॥

(२) शुक्रेऽरिनीचमपहाय कुटुम्बसंस्थेलग्नेश्वरे बलयुते पृथिवीपति स्यात्।
चन्द्रेऽतिमित्रनिजभागगते निशायां शुक्रेक्षिते नृपतिरन्यविलोकहीने॥

**प्रश्नः – ८ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** ०८

(१) दुरधरायोग: कथं उत्पद्यते?फलसहितं वर्णयत।

(२) भास्कर-मरुद्-इन्द्रयोगा:

**प्रश्नः – ९ अधोनिर्दिष्टेषु त्रयाणाम् अतिलघूत्तरं यच्छत** ०३

(१) अनफायोग: कथं भवति ?

(२) उच्चस्था: ग्रहा: किदृशं फलम् यच्छन्ति ?

(३) पापग्रहा: तृतीय-एकादश-षष्ठभावे स्थिता: सन्ति एवं लग्नेश: शुभग्रहदृष्टोऽस्ति चेत् कि फलम्?

(४) उपचयभावा: के ?

(५) उदररोग: कदा भवति ?

## चतुर्थान्वितिः (Unit-४)

**प्रश्नः – १० अधोलिखितयोः एकस्य सान्वयं ससन्दर्भं व्याख्या कार्या।** ०४

(१) एकर्क्षगैरिनशशिक्षितिजज्ञजीवैर्जातस्तु: युद्धकुशल: पिशुन: समर्थ:।
शुक्रारभानुबुधशीतकरैर्विधर्मश्रधालुरन्यजनकार्यपरो बिबन्धु॥

(२) मूलावासवयोर्मघाभुजगयो: पौष्णाश्वयो: सन्धिजं।
गण्डान्तं प्रहरप्रमाणमधिकानिष्टप्रदं प्राणिनाम्॥

**प्रश्नः – ११ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** ०८

(१) पञ्चग्रहयोगा:

(२) मूलनक्षत्रोत्पन्नजातस्य फलम्

**प्रश्नः – १२ निम्नलिखितेषु त्रयाणाम् अतिलघूत्तरं यच्छत।** ०३

(१) गण्डान्त: कदा भवति ?

(२) ज्येष्ठानक्षत्रस्य द्वितीयांशे जात: जातकस्य किं फलम् ?

(३) गण्डान्ततारा: के ?

(४) शुक्लपक्षोत्पन्न: जातकस्य किं फलम्?

(५) प्रतिपदायां उत्पन्न: जातकस्य किं फलम् ?

***